श्री स्वामिनारायणो विजयतेतराम् ॥

chapter-5

# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## पञ्चमोऽध्यायः

( ब्रह्मनिरूपणात्मकः )

# श्रीस्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## पञ्चमोऽध्यायः

### ५.१ ब्रह्मतत्त्वनिरूपणम्

भगवता श्रीस्वामिनारायणेन निर्दिष्टेषु तत्त्वेषु ब्रह्मतत्त्वं चतुर्थं तत्त्वमास्ते। भगवान् स्वामिनारायणो वचनामृते ग्रन्थे प्राह यद् ब्रह्मणः ब्रह्म, अक्षर-अक्षरब्रह्मेति त्रिभिर्नामभिः निर्देशस्तत्र तत्र शास्त्रेषु समुपलभ्यते । तदिदं ब्रह्म अनन्त कोटीन्द्वर्कसमतेजस्सम्पन्नमस्ति। तदिदं मूर्तिमद् भगवद्धाम स्वरूपं विद्यते। अत्र धामशब्दस्तेजपरः ।

श्रीगोपालानन्दस्वामी तु अक्षरब्रह्मण संज्ञात्रय इति, **आद्यं**-प्रकृतिसंबन्ध रहितं पुरुषोत्तम निवासभूतं अक्षर ब्रह्माभिधं ब्रह्मपुरधाम बोध्यम् । **द्वितीयं**-पुरुषोत्तमोपासकं तद्धामस्थं मुक्तकोटिवृन्दं च। **तृतीयं-पुरुषोत्तमेच्छया ब्रह्माण्डोत्पादकः प्रकृत्यधिष्ठाताऽक्षरपुरुषं च**[१]। पञ्चतत्त्वनिर्णय नामके ग्रन्थे प्राह श्रीकृष्णवल्लभाचार्यः ब्रह्मस्वरूपं वर्णयन्

**आश्रितत्वाद्गुणाश्चायं प्रसृतत्वात् पृथक्स्थितः ।**
**द्रव्यात्मकोऽक्षरश्चाऽयं बृहत्त्वाद् ब्रह्मतत्त्वकम् ॥**
**एकस्यैव गुणत्वे च द्रव्यत्वे न विरोधिता ।**
**आश्रितत्वात्मप्रसारत्वाद्व्यवस्थायाः पृथकस्थितेः ॥**
**व्यापकं चाक्षरं ब्रह्म भूम द्रव्यं प्रकाशते ।**
**सर्वात्मकं धाम चैतत् केवलान्वयि वर्तते ॥**
**अवृत्ति वृत्तिमत्त्वेऽपि चान्तर्यामि च साक्षि च ।**
**आनन्दतत्त्वतश्चैतत् तत्त्वान्तरमितीरितम् ॥**
**ज्ञातृज्ञानगुणकं तत् सर्वशक्त्यादिसंभृतम् ।**
**ज्ञप्तिसाधर्म्येऽपि भेदः सदानन्दप्रकाशयोः ॥**
**स्वरूपेण तथा तत्त्वान्तरता धामधामिनोः ।**
**प्रेर्यप्रेरकभावेन लोकलोकाऽधिपत्वतः [२]॥**

अस्य ब्रह्मतत्त्वस्य शास्त्रेषु यद् वर्णनं प्राप्यते विविधाभिः संज्ञाभिस्तस्य वर्णनमत्र प्रस्तूयते श्रीकृष्णवल्लभाचार्याणां शब्दैः-अथ ब्रह्मेति, प्रकाशो वा, व्यापकचिदाकाशो वा, तेजःप्रदात्मा वा, जडचेतनग्रन्थिचेतयितृ वा, सर्वत्राऽनुस्यूतधाम वा,सर्वतत्त्वप्रतियोगिप्रेरयितृ वा, जीवमायेशान्विद्चित्प्रकाशो

---

१-जीवेश्वरादि पञ्चभेद-निरूपणनिबन्धः पृ. २४९
२-पञ्चतत्त्वनिर्णयः पृ. नं. ११३

**वा, सर्वाधारभूमिर्वा, मुक्तादिवास्यलोको वा, अक्षरब्रह्म वा, शबलब्रह्म वा, केवलब्रह्म वा, अव्याकृतब्रह्म वा, अमृतब्रह्म वा, अमायिकलोकोवा, दिव्यपरमपदं वा, आत्मेशतत्त्वं वा, नित्यगोलोकवैकुण्ठादिमोक्षपदं वा, त्रिपाद्विभूतिर्वा, मूर्तान्विताऽमूर्तपूर्णपदं वा, विमर्शस्तरो वा, व्यापकचैतन्यं वा, परब्रह्मकिरणं वा, अलौकिकैश्वर्यं वा, मुक्तिपदं वा, सर्वात्मचिद्वा, सर्वाकर्षकबलं वा [१]।**

तत्र तत्र दर्शनेषु ब्रह्मणः वर्णनमुपर्युक्तरूपेण वर्तते । अस्मिन् ब्रह्मणि निम्नांकितानि श्रौतानि स्मार्तानि च वचांसि भवन्ति प्रमाणानि ।

**'अक्षरं ब्रह्मपरमम् [२]।'**
**'क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते [३]।'**
**'ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च [४]। '**
**'अव्यक्तोऽक्षरमित्याहुः तमाहुः परमां गतिम् [५]।**
**'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम [६]॥**

**'अथ परा यया तदक्षरमधिगम्यते' [७], 'अक्षरात् सम्भवतीह विश्वम् [८]'। 'एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः [९]'।'ब्रह्मैवेदं सर्वं सच्चिदानन्दरूपम् [१०]'। 'सत्यं ज्ञानमनन्तं ब्रह्म [११]'।'महतः परमव्यक्तं अव्यक्तात् पुरुषः परः [१२]'।'बृहच्च तद् दिव्यमचिन्त्यरूपम् [१३]'।'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् [१४]'। 'अद्वैतो भवत्येष ब्रह्मलोकः [१५]।' 'तद्वा एतदक्षरं गार्ग्यद्रष्टृ द्रष्टृश्रुतम् [१६]'। 'यः सेतुरीजानानामक्षरं ब्रह्म यत् परम् [१७]'।'यदर्चिमद्यदणुभ्योऽणु च यस्मिंल्लोकानिहिताः लोकिनश्च । तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः [१८]'।**

एतेषु सर्वेषु वाक्येषु ब्रह्मस्य, अक्षर, ब्रह्म, अक्षरधाम इत्यादि शब्दैः स्पष्टतया समुल्लेखो दृश्यते ।

पण्डितवरेण्यः श्रीकृष्णवल्लभाचार्यः स्वकीये श्रीस्वामिनारायण-वेदान्तसारनाम्नि ग्रन्थे निम्नांकित प्रकारेण ब्रह्मतत्त्वस्य स्वरूपं निरूपयामास-

---

१-तत्त्वप्रभावलि - पृ.नं.११-१७
२-भगवद्गीता ८/३
३-भगवद्गीता १५/१६
४-भगवद्गीता ४/२७
५-भगवद्गीता ८/२१
६-भगवद्गीता ८/२
७-मुण्डकोपनिषत् ३/२/५
८-मुण्डकोपनिषत् ३/१/१/७
९-बृहदारण्यकोपनिषत् ३/८/९
१०-नृसिंहतापिन्युपनिषत् ७/१
११-तैत्तिरीयोपनिषत् २/१
१२-कठोपनिषत् १/३/११
१३-मुण्डकोपनिषत् ३/१/७
१४-कठोपनिषत् १/२/१२
१५-बृहदारण्यकोपनिषत् ४/३/३२
१६-बृहदारण्यकोपनिषत् ३/८/११
१७-कठोपनिषत् १/३/२
१८-मुण्डकोपनिषत् २/२/२

**'मुक्तादीनामाधारत्वे सति परब्रह्मप्राप्य चेतनत्वम्।''परब्रह्मभिन्नत्वे सति सर्वाधारैकचेतनत्वम्' साकारनिराकारोभय स्वरूपवत्वचेतनत्वम्, केवलान्वयित्वे सति शरीरत्वम्, जीवेश्वरमुक्तपरब्रह्मभिन्न चेतनत्वम्। भोग्यभोगोपकरण विशिष्टत्वे सति परमेश्वर धामत्वं वेत्यादीनि तल्लक्षणान्यसेयानि। तच्चब्रह्म नित्यशुद्धबुद्धमुक्त स्वभावं परब्रह्मणस्तेजोविशिष्टमक्षरधामसंज्ञकं मुक्तानामाधारभूतं चेति**[1]।'

अत्राचार्यवर्यै ब्रह्मणः संख्याकानि लक्षणानि अभिहितानि। तत्र **प्रथमे लक्षणे**-ब्रह्मणः मुक्तादीनामाधारत्वम्, परब्रह्म प्रापकत्वञ्चाभिहितम्। ब्रह्म प्राप्यं यस्य तथाविधसूचेतनः तस्यभावस्तत्त्वमिति ब्रह्मप्राप्यचेतनत्वस्यार्थः। **द्वितीये लक्षणे**- ब्रह्मणः परस्माद् ब्रह्मणो भिन्नत्वम् परब्रह्मव्यतिरिक्तानां सर्वेषामाधारत्वं चाभिहितम्। **तृतीये लक्षणे**- ब्रह्मणो निराकार-साकारोभयविशिष्टत्वमभिहितम्। **चतुर्थे लक्षणे**-हि तस्य केवलान्वयित्वं परस्य ब्रह्मणः शरीरत्वमुक्तम्। **पञ्चमे लक्षणे**-ब्रह्मणो जीवेश्वरमुक्तपरब्रह्मेभ्यो भिन्नता अभिहिताऽस्ति। **षष्ठेऽन्तिमे लक्षणे**-ब्रह्मणो भोग्य-भोगोपकरणविशिष्टता परमेश्वरस्य धामता चाभिहिताऽस्ति।

श्रीकृष्णवल्लभाचार्यै अत्र सत्सङ्गिजीवनस्य निम्नांकितानि प्रमाणान्यभिहितानि-

**सत्यं ज्ञानमनन्तं च पूर्णञ्चाखण्डमक्षरम्।**
**धाम यद् वासुदेवस्य मूर्तञ्चामूर्तमुच्यते**[2]। इति।

अनेन श्लोकेन ब्रह्मणो वासुदेवधामत्वं साकारत्वं निराकारत्वञ्च कण्ठतः उक्तानि।

**सत्यं ज्ञानमनन्तं यदब्रह्मज्योतिः सनातनम्।**
**यद् हि पश्यन्ति मुनयो गुणापाये समाहिताः**[3] ॥ इति ॥

अस्मिन् श्लोके ब्रह्मसनातनज्योतिरुपेणोक्तं वर्तते।

**शुद्धं नित्यं चाविकारि मायादीनां प्रकाशकम्।**
**तद्ब्रह्मेति विजानीहि सर्वाधारतया मतम्** । इति

अनेन श्लोकेन द्वारा श्रीशतानंदमुनिः ब्रह्मणः विकाररहित्वम्, मायादीनां तत्वानां प्रकाशकं सर्वाधारत्वञ्चाह।

श्रीभागवत् महापुराणस्यापि-

**तदाहुरक्षरं ब्रह्म सर्वकारणकारणम्।**
**हरेर्धाम परं साक्षात् पुरुषस्य महात्मनः** । इति

---

१-श्री स्वा. वेदान्तसार पृष्ठ -२४

२-सत्सङ्गिजीवनम् : १/५१/३२

३-तैत्तिरियोपनिषत् -२/१/१

अस्मिन्श्लोके ब्रह्म अक्षरब्रह्मशब्देनाभिहितं वर्तते । तस्यैव श्रीहरेर्धामत्त्वमप्यभिहितम्।

तैत्तिरीय संहितायामपि ब्रह्मणो वर्णनं समुपलभ्यते । तथा च मन्त्रः-

**'क्षयन्तमस्य रजसः पराके तदक्षरे परमे व्योमन् योऽस्याऽध्यक्षः[१]'** इति।

किञ्च **लोयापञ्चदशे वचनामृते** नित्यानंदस्वामिनं प्रश्नोत्तरे भगवान् श्रीहरिराह- **'जीवः पुरुषः अक्षरं पुरुषोत्तमश्चेत्येतेषां समेषां तेजस्तु प्रकाशत्वेन रूपेण सजातीयं विद्यते, अत एव तस्य भेदस्य वर्णने कश्चनापि समर्थो नास्त्यथाऽपि भेदस्त्वत्यन्तो विद्यत एव। सन्तमपि तं भेदं निरूपयितुं नहि भवति कश्चनापि समर्थः । यस्योपरि भगवान् दयते स एव जानाति यदयमहमस्मि; अयं पुरुषोऽस्ति, इदमस्ति चाक्षरम्, किञ्च एतेभ्यः सर्वेभ्यो विलक्षणो वर्तते भगवान् पुरुषोत्तमः ।** अनेन प्रकारेण सो भगवत् कृपा लब्धो जीवः; तान् सर्वान् पृथक्तया साक्षात्करोति । किञ्च सः पुरुषः तेषां प्रकाशानपि विलक्षणतया पृथक्तया च पश्यति । अतः परमेश्वरस्य तेजसोऽतिरिक्तमक्षरं ब्रह्मतेजमत्, इति ।

श्रीमद्भगवद् गीतायां तु वारं वारं ब्रह्मणः चर्चा आयाति । तथाहि-

**'एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति[२]'** । इति **'ब्रह्मार्पणं ब्रह्महविः.....ब्रह्मकर्म समाधिना[३]'**। इति **यान्ति ब्रह्मसनातनम्[४]**'। इति **'ब्रह्म न चिरेणाधिगच्छति[५]'**। **'ब्रह्मण्याधाय कर्माणि[६]'**। **'तस्माद् ब्रह्मणि ते स्थिताः[७]'**। **'ब्रह्मविद् ब्रह्मणि स्थितः[८]'**। **'ब्रह्म संस्पर्शमत्यन्तं सुखमश्नुते[९]'**। इति **'ते ब्रह्म तद् विदुः कृत्स्नम्[१०]'**। इति च '

इत्थं भगवद्गीतायाः द्वितीयाध्यायादारभ्यैवासकृद् ब्रह्मणो वर्णनमाकर्ण्यार्जुनोऽपि- **'विमूढो ब्रह्मणः पथि[११]'** पप्रच्छ भगवन्तम्-**'किं तद् ब्रह्म[१२]'** इति ।

अस्योत्तरमस्ति यद्ब्रह्म केवलं ब्रह्म शब्दाभिलप्यमेव नहि भवति ब्रह्मशब्दाभिलापेन तस्य ज्ञानं न हि सम्भवितुमर्हति ।

भगवान् श्रीस्वामिनारायणोऽपि धृतवर्णिवेषः समेषु तीर्थेषु विचरन् सन्

---

१-तैत्तिरीय संहिता २/२/१२/६
२-भगवद्गीता २/७२
३-भगवद्गीता ४/२४
४-भगवद्गीता ४/३१
५-भगवद्गीता ५/६
६-भगवद्गीता ५/१०
७-भगवद्गीता ५/१९
८-भगवद्गीता ५/२०
९-भगवद्गीता
१०-भगवद्गीता ७/२९
११-भगवद्गीता ६/३८
१२-भगवद्गीता ८/१

तान्-तान् पण्डितप्रकाण्डान् समुपलभ्य ब्रह्मणः स्वरूपविषये प्रश्नानकार्षीत् परन्तु कश्चनापि तस्य सन्तोषप्रदमुत्तरं दातुं नहि समर्थोऽभूत्। आभाति यदिदानीं यावदिदमित्थन्तया कश्चनापि ब्रह्मणः स्वरूपनिर्देशकरणे नहि समर्थो भविष्यति।

अत एवेदानीं यावदपि ब्रह्मणः स्वरूपनिरूपणमस्पष्टमेव वर्तते । मन्ये सर्वापेक्षया श्रीपण्डित कृष्णवल्लभाचार्य कृतानि ब्रह्मलक्षणान्येव प्रशस्तानि वर्तन्ते। किन्तु तेऽपि पण्डितवरेण्याः स्वीकुर्वन्ति यद् ब्रह्मण इदमित्थन्तया वर्णनम शक्यमेवेति ।

## ५.२ ब्रह्मणोऽन्वयव्यतिरेकस्वरूपनिरूपणम्

ब्रह्मणः स्वरूप निरूपणानन्तरं तस्यान्वयव्यतिरेकद्वारा स्वरूपं विविच्यते मया। तत्तदधिष्ठातृत्वमेवान्वयित्वम्, स्वरूपमात्रत्वञ्च व्यतिरेकित्वम्। अनन्तकोटि ब्रह्मण्डेषु माया-मायाकार्येषु स्वतेजसा व्यापकत्वमेवाऽन्वयः । तद्विपरीतः सर्वतो व्यतिरिक्तः सच्चिदानन्दस्वरूपः व्यतिरेको भवति। ब्रह्म च मूर्ताऽमूर्तरूपं वर्तते अत एव तस्यान्वयव्यतिरेकयोः काचनापि विप्रतिपत्तिर्भवितुं नार्हति कस्यचनापि ।

भगवान् स्वामिनारायणः वचनामृतस्य गढपुर प्रकरणे सप्तमे वचनामृते निम्नांकि तेन प्रकारेणान्वयव्यतिरेकयोः प्रतिपादनमकार्षीत्- '**मायायां तस्या अनेककोटिब्रह्माण्डरूपेषु कार्येषु व्याप्तोऽस्त्यक्षरम्। इत्थं ब्रह्मणोऽन्वयित्वं सिद्ध्यति। किञ्च सच्चिदानन्दस्वरूपमक्षरब्रह्म तेभ्यः सर्वेभ्यो व्यतिरिच्यते**, इति ब्रह्मणः व्यतिरेकित्वम् '।

सारङ्गपुरप्रकरणस्य पञ्चमेऽमृते भगवान् स्वामिनारायणोऽगादीष्ट यत् **प्रकृतिपुरुषसूर्यचन्द्रदेवतानां प्रेरकम्। यदक्षरं ब्रह्म स्वरूपं तदन्वयस्वरूपम्, यत्र चाक्षरे प्रकृति पुरुषाद्युपाधिरहितत्वं पुरुषोत्तमैकवासः तदेवाक्षरस्य व्यतिरेकता**। इति।

श्रीहरिवाक्य सुधासिन्धावप्यभिहितम्-

**पुरुषस्य च मायायाः सूर्यादीनां प्रशास्तृता ।**
**नैकाण्डाश्रयतेत्युक्तं ब्रह्मणोऽन्वयलक्षणम् ।**
**सर्वत्र व्यापकत्वेऽपि व्योमवत् तदसंगिता ।**
**कृष्णस्यानुगधामत्वं व्यतिरेकोऽस्य गद्यते**[१]॥ इति

अत्र श्रीहरिवाक्यसुधासिन्धुकारः व्योम्नो दृष्टान्तमदादित्येवैतस्य कथनस्य पूर्वापेक्षया वैशिष्ट्यम् ।

---

१-हरिवाक्यसुधासिन्धुः ७/१२-१३

येन प्रकारेण् गगनस्थितानां वायूनां दोषैः गुणैश्च सम्पृक्तो नहि भवति यथा च पृथिव्यां विद्यमानोऽपि सन् भूमेः गन्धगुणेन साकं संपृक्तो नहि भवति तेनैव प्रकारेण ब्रह्म सर्वाधेयैः साकं विद्यमानमपि तेषां दोषैः गुणैः वा संकलितो न भवति।

इत्येवास्ति ब्रह्मणोऽन्वयित्वं व्यतिरेकित्वञ्च।

## ५.३ ब्रह्मणः सगुणत्वनिर्गुणत्वयोर्निरूपणम्

शास्त्रेषु सामान्यतः सगुणत्व-निर्गुणत्वयोश्चर्चा कृता वर्तते। तस्या एवालोके ते त आचार्याः परस्य ब्रह्मणः स्वस्वमतानुसारेण सगुणत्वं निर्गुणत्व ञ्च प्रतिपादयामासुः। शङ्कराचार्यः निर्गुणत्वं प्रत्यपीपदत् किन्तु भक्तेः प्राधान्यं मन्यमाना आचार्याः परस्य ब्रह्मणः सगुणत्वमेव स्वीचक्रुः। किन्त्वत्र तु मया भगवतः श्रीस्वामिनाराणस्य सूक्तीनामालोके ब्रह्मण एव सगुणत्वनिर्गुणत्वयोः निरूपणं क्रियते। तथाहि-

भाषा वचनामृतस्य गढपुरमध्यमप्रकरणे द्विचत्वारिंशत्तमे वचनामृते भगवान् स्वामिनारायणः प्राह यत् "**सगुणनिर्गुणभावौ परस्मिन् ब्रह्मणि न भवतः अपि त्वक्षरे ब्रह्मण्येव**" इति।

'**यस्याक्षरं शरीरम्**[1]।' इति श्रुतिरपि अक्षरस्य ब्रह्मणः परस्य ब्रह्मणः शरीरत्वमभिधत्ते। प्रलयावस्थायामपि परस्मिन् ब्रह्मणि अक्षर ब्रह्मात्मकप्रकाशे सर्वत्र व्याप्ते अनन्तानि ब्रह्माण्डानि सावकाशं स्थितानि भवन्ति। परब्रह्म शरीरभूतमक्षर ब्रह्मतेजः सर्वान्तः प्रविष्टं सर्वान्वयि सूक्ष्मादप्यतिसूक्ष्मं विद्यते। '**अणोरणीयान् महतो महीयान्**[2]' इति श्रुति '**अक्षरस्य महत्तमत्वं अणीयस्त्वं च ब्रूते। अत एव तस्य तेजः स्वरूपस्य ब्रह्मणः सर्वत्र व्यापकताऽऽभाति। इत्थं ब्रह्मणो द्वे रूपे भवतः, अणुर्महच्च। तत्र यदणु रूपं तन्निर्गुणं, यच्च महद्रूपं तदेव सगुणम्, इति प्राह ब्रह्मरसायनभाष्यकारः श्रीपण्डित कृष्णवल्लभाचार्यः**[3]'।

अक्षरब्रह्मणः मूर्ताऽमूर्तत्वयोः चर्चाऽवसरे भगवान् स्वामिनारायणः प्रतिपादितवान् तस्य धामरूपतां साकाररुपताञ्च।

श्रीहरिवाक्यसुधासिन्धौ ब्रह्मणः सगुणत्वनिर्गुणत्वयोः प्रदिपादनावसरोऽभिहितो वर्तते।

---

१-सुबालोपनिषत् ७/१
२-कठोपनिषत् १/२/२०
३-ब्रह्मरसायनभाष्यम् तृतीयखण्डः, पृष्ठ -३६९

**कृष्णोऽक्षरेब्रह्मरूपे सावकाशाः भवन्ति ताः ।**
**सूक्ष्मादप्यतिसूक्ष्मं तन्महतोऽपि महत्तमम् ॥**
**आद्यं तत्रास्त्यमूर्तं तु धाम तेजोमयं तथा ।**
**मूर्तं पुरुषरूपं च सर्वाधारं द्वितीयकम् ॥**
**आद्यं निर्गुणमित्युक्तं सगुणं च तथेतरत् ।**
**अनिर्देश्यमिति प्रोक्तं द्वेधा शक्तियुतं तु तत्[१]॥**

किञ्चाग्रेऽप्युक्तं वर्तते अस्मिन्नेव तरङ्गे सुधासिन्धोः-

**"एकैकरोम्णि तस्यैव सन्त्यण्डान्यणुवन्मुने ।**
**नैतावता तु ब्रह्माण्डगोलसूक्ष्मत्वसंभवः ॥**
**यावत्प्रमाण उदितः शास्त्रे ब्रह्माण्डगोलकः ।**
**स तावानेव भवति तद्विधा अपरेऽपि च ॥**
**ब्रह्मणोऽतिमहत्वेन तदणूपमतोच्यते ।**
**रैवताद्रेर्यथा मेरोः पुरतस्त्वस्ति सूक्ष्मता ॥**
**लोकालोकाचलस्याग्रे यथा मेरुपर्वतः ।**
**असूक्ष्मोऽपीक्ष्यते सूक्ष्मो लोकालोकमहत्तया ॥**
**अक्षरातिमहत्त्वेन तथा ब्रह्माण्डसूक्ष्मता ।**
**उच्यते वस्तुतः सन्ति सर्वेऽपि हि यथा तथा[२] ॥** इति

अत्रोदाहृतानां श्लोकानां निभालनेन ज्ञातुं शक्यते यदन्वयव्यतिरेकस्वरूप-मेवात्र सगुणनिर्गुणशब्दाभ्यां प्रतिपादितमस्तीति ।

## ५.४ ब्रह्मणः परब्रह्मधामरूपत्वम्

परमात्मा मूर्तमक्षरब्रह्मब्रह्मान्यञ्चापि भवन् मुक्तानां नित्यनिवासस्थानम् धामस्वरूपं अक्षरब्रह्म विद्यते । येन प्रकारेण पृथिवी आधाररूपा सती मनुष्यपशुपक्षिणः धत्ते तथैवाक्षरधामापि जीवादिकानां धारणं करोति ।

तदिदमक्षरं धामानन्तायामं तेजोमयं च विद्यते । इदं परस्य ब्रह्मणो धाम स्वरूपं विद्यते ।

**'अक्षरात् परतः परः[३]'** श्रुति अक्षरपरब्रह्मणोः भेदमपि व्यपदिशति । किं इदमक्षरमेव परस्य ब्रह्मणः तेजोमयं धामस्वरूपं वर्तते । अधस्तादुपरिष्टादपरिमेयं वर्तते । इदं हि सनातनं नित्यं अप्राकृतं, मायातीतं सच्चिदानंदस्वरूपं च विद्यते ।

---

१-हरिवाक्यसुधासिन्धुः १७५/६-८
२-हरिवाक्यसुधासिन्धुः १७५/९-१३
३-मुण्डकोपनिषद् २/१/२

वचनामृतस्य गढपुरे प्रथमप्रकरणे भगवान् स्वामिनारायणः द्वादशे वचनामृते अस्याक्षरधाम्नोर्वर्णनं कुर्वन् वक्ति यत्- **भगवतो धाम इदं सनातनं, नित्यं प्राकृतं सच्चिदानंदरूपमनन्तमखण्डं च वर्तते । अत्र दृष्टांतमेकमुपन्यसन् भगवान् वक्ति यत् यथा सर्वैः पर्वतैः वृक्षादिभिः मनुष्यादिभिश्च सहिता काचनिर्मिता पृथ्वी भवेत्, तारागणैः सूर्येण च व्याप्तः आकाशः तस्यां प्रतिबिम्बितो भवेत् । तेन जायमानाशोभावत् भगवतोधाम अक्षरं देदीप्यमानं विद्यते । भगवद्भक्ताः भगवतस्तद् धाम्नः समाधौ साक्षात्कारं कुर्वन्ति देहपातानन्तरं च ते तस्मिन्नेव धाम्नि यान्ति [१]।'**

वेदरसनामके पत्रे भगवान् अस्याक्षरधाम्नोर्वर्णनं कुर्वन् वक्ति- **'अस्मिन् ब्रह्मधामनि निवसतां सतां प्रत्येकस्मिन् रोम्णि तादृशो भवति चन्द्रप्रकाशः येन प्रलयकालीनानां द्वादशादित्यानामपि प्रकाशाऽभिभूतो भवेत् [२]।'**

श्रीस्वामिनारायणदर्शनसूत्रमपि अक्षरधाम्नि प्रमाणम् । तथा च सूत्रम्-

**'एकरसतेज आत्मनोऽक्षरधामत्वात् [३]।'** इति

अत्र च कल्याणी वृत्तिः- **'श्रीहरिः स्वयमानन्दधनमूर्तिः तत्प्रकाशो दिव्यतेजोधनः, स्वमूर्ति प्रकाशोऽयं व्यक्तः सर्वत्र ब्रह्मलोकः त्रिपादूर्ध्व-मर्धमेकपादधःस्तोऽक्षरधाम त्रिपात् । सृष्टिप्रविष्ट एकपादः सृष्टौ प्रकाशा-अक्षर ब्रह्म प्रकाशाऽनुसमुद्भूतप्रकाशाः मायागोलकेष्वीश्वर प्रकाशाः सूर्याद्यानेत्राद्याश्च [४] ।'**

मायातत्त्वमयं तेजोऽपि ब्रह्मप्रकाशसम्भूतं प्रकाशकरम् । अन्यथा-तेजोऽप्यन्धकाराऽवस्थ स्यात् ।

**तथा च हरिवाक्यसुधासिन्धावुक्तम्-**
**'यस्मिंस्तेजसि तद्रूपं भवत्येकरसे सिते ।**
**तदक्षरादि ब्रह्मादि नामभिः सम्प्रकीर्त्यते ॥**
**यः तत्र भगवान् साक्षात् सः परब्रह्मसंज्ञकः।**
**आत्मतत्त्वाभिधश्चासौ पुरुषोत्तम उच्यते ॥**
**न तद्भासयते सूर्यो शशांको न पावकः ।**
**यद्गत्वा न निवर्तन्ते तद्धाम परमं मम [५]॥** इति

एवमेव द्वादशे तरङ्गेऽप्यभिहितम्-

**नित्यमप्राकृतं दिव्यं सच्चिदानन्दमक्षरम् ।**

---

१-वचनामृतम् गढडा प्रथम -१२
२-वेदरस पृ-१४४
३-स्वामिनारायणदर्शनम् -९४/१७४
४-तत्रैव सूत्रस्यकल्याणीवृत्तिः
५-हरिवाक्यसुधासिन्धुः १४६/३०-३१

**ब्रह्माख्यं धाम तत्प्रोक्तं कृष्णस्यानन्तमुज्ज्वलम्**[१]॥
अन्यत्राऽप्यभिहितं हरिवाक्यसुधासिन्धावेवाक्षरब्रह्मधामत्वम्-

**सूक्ष्मादप्यतिसूक्ष्मं तन्महतोऽपि महत्तमम् ।**
**आद्यं तत्राऽस्त्यमूर्तं तु धामतेजोमयं तथा ।**
**मूर्तं पुरुषरूपं च सर्वाधारं द्वितीयकम्**[२]। इति

एभिः सर्वैः प्रमाणैः ब्रह्मणः परब्रह्मधामरूपता सिद्धयति । पञ्चतत्त्व निर्णयेऽपि श्रीकृष्णवल्लभाचार्येणोक्तं यत्

**सेवार्था भूमिका नित्यधामरूपा हरिश्रिता ।**
**सर्वप्रकाशदा मूलाऽऽपूरिका भूमिका स्थिता ॥**
**भोग्यभोगोपकरणाद्यात्मवस्तुस्वरूपिणी ।**
**प्रकाशभूमिका सेयं धामरूपा हि शाश्वती**[३]॥

## ५.५ ब्रह्मणः स्वरूपनिरूपकाः धर्माः

ब्रह्मतत्त्वनिरूपणावसरे मयाऽभिहितं ब्रह्मिदं नैकैः धर्मैः विशिष्टं वर्तते। तदिदं साम्प्रदायिकेषु ग्रन्थेषु तत्र-तत्र निरूपितं वर्तते। ब्रह्मणः केषाञ्चनस्वरूप-निरूपकाणां धर्माणामत्र विवेचनं क्रियते-

१. मुक्तादीनां समेषामाधारो भवति ब्रह्म- प्रमाणञ्चात्र श्रुतिः निम्नांकिता-

**'यदर्चिमदणुभ्योऽणु च यस्मिंल्लोका निहितालोकिनश्च तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः**[४]।'

इयं श्रुति ब्रह्मणः सर्वाधारत्वं स्पष्टरूपेणाभिधत्ते ।

श्रीमद्भागवत् महापुराणेऽप्यस्य ब्रह्मणः सर्वाधारत्वं निम्नांकितै श्लोकैः महर्षि मैत्रेयोऽऽधत्ते-

**विकारैः सहितो युक्तैः विशेषादिभिरावृतः ।**
**आण्डकोशो बहिरयं पञ्चाशत् कोटि विस्तृतः ॥**
**दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ।**
**लक्ष्यतेऽन्तर्गताश्चान्य कोटिशोऽप्यण्डराशयः ॥**
**तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ।**

---

१-हरिवाक्यसुधासिन्धुः १२/४७
२-हरिवाक्यसुधासिन्धुः १७५/६-७
३- पञ्चतत्त्वनिर्णयः पृ. ११५
४- मुण्डकोपनिषत् २/२/२

**विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः**[१]॥ इति ।

२. अक्षरं ब्रह्म विकाररहितं पूर्णञ्च वर्तते-'**ब्रह्मैवेदं सर्वंसच्चिदानन्दरूपम्**[२]।' इति श्रुतिः ब्रह्म कूटस्थमभिवक्ति । '**अनाद्यनन्तं महतः परं ध्रुवम्**[३]।' इति श्रुतिरस्य ब्रह्मण नित्यत्वं निश्चलत्वं वक्ति ।
'**कूटस्थोऽक्षर उच्यते**[४]' इति गीतावाक्यम् अक्षरस्य कूटस्थता वक्ति ।
**पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।**
**पूर्णस्य पूर्णमादाय पूर्णमेवाऽवशिष्यते**[५]। इति
शान्ति पाठस्य मन्त्रः ब्रह्मणः पूर्णतां प्रतिपादयति ।
अत एव ब्रह्मणो पूर्णत्वञ्च सिद्धयति ।

३. अक्षरं ब्रह्म भगवन्मूर्ति प्रकाशकं वर्तते-तथा चात्र हरिवाक्यसुधासिन्धुः, यस्य निम्नांकितः श्लोकः प्रमाणम्-
**नित्यमप्राकृतं दिव्यं सच्चिदानन्दमक्षरम् ।**
**ब्रह्माख्यं धाम तत् प्रोक्तं कृष्णस्यानन्तमुज्जवलम्**[६]॥ इति ।

४. अक्षरं ब्रह्म सगुणनिर्गुणभाव रूपञ्च वर्तते । तथा चोक्तं हरिवाक्यसुधा सिन्धौ-
**कृष्णोऽक्षरे ब्रह्मरूपे सावकाशं भवन्तिताः**
**सूक्ष्मादप्यति सूक्ष्म तन्महतोऽपि महत्तमम् ।**
**आद्यं तत्राऽस्त्यमूर्तं तु धाम तेजोमयं तथा ॥**
**मूर्तं पुरुष रूपं च सर्वाधारं द्वितीयकम् ।**
**आद्यं निर्गुणमित्युक्तं सगुणं च तथेतरत्**[७]।' इति ।
अनेनैव प्रकारेण ब्रह्मणोऽनेके सन्ति स्वरूपनिरूपकधर्माः यथा- परब्रह्म व्याप्य चेतनत्वम्, परब्रह्म शरीरत्वम्, जीवेश्वरमुक्तपरब्रह्मभिन्नत्व मित्यादिकाः । ते सर्वे तेषु तेषु सम्प्रदायग्रन्थेषु तत्र-तत्राभिहिताः विस्तरेण ।

## ५.६ ब्रह्मपरब्रह्मणोः भेदसमर्थनम्

भगवान् स्वामिनारायणः यानि पञ्चतत्त्वान्यभ्यधात् तेषु ब्रह्मपरब्रह्माणौ पृथक्-पृथक् निर्दिष्टौ । एतेनैव तयोर्भेदः सिद्धयति । अथापि प्रमाणानामालोके तयोर्भेदो निरूप्यते ।

---

१-श्रीमद्भागवतम् ३/११/३९-४१
२-नृसिंहोपनिषत् ७/३
३-कठोपनिषत् ३/१५
४-भगद्गीता १५/१६
५-शांतिपाठः
६-हरिवाक्यसुधासिन्धुः १२/४७
७-हरिवाक्यसुधासिन्धुः १७५/६-७

श्रीस्वामिनारायणदर्शनानुसारेण ब्रह्म जीवेश्वरमायानां नियामको वर्तते, किन्तु तत् परस्य ब्रह्मणो नियाम्यं वर्तते। अत एव ब्रह्मण: स्वरूपनिरूपणात्मके प्रथमे लक्षणेऽभिहितम् '**मुक्तादीनामाधारत्वे सति परब्रह्मव्याप्य चेतनत्वम्**[१]।' इति

ब्रह्मस्वचिच्छक्त्या हि जीवेश्वरयो: व्यापक:। किन्तु कर्मानुसारेण फलं प्रददातीति भगवान् स्वामिनारायण:। अत्र ब्रह्मण: स्वरूपविज्ञाने ब्रह्मपरब्रह्माभेद भ्रान्ति सम्भवा। समानगुणधर्मत्वात्, उभयोरैक्येन प्रतिपादनाच्च।

गूढमचिन्त्यमव्यक्तोऽक्षरसर्वव्यापक सर्वशरीरीत्वादिकं ब्रह्मणो गुणा:। परंब्रह्म तु समानगुणयोगि भासते।

भगवता स्वामिनारायणेन श्रीवचनामृते ग्रन्थे प्रोक्तम्-

'**जीवपुरुषाक्षर पुरुषोत्तमानां मह: प्रकाशरूपेण् सजातीयम्। यद्यपि जीव परब्रह्मणो भेदो वर्तते परन्तु तस्य वर्णनं केनापि कर्तुं नहि पार्यते। तस्य भेदस्य साक्षात्कारं स एव भगवद् भक्त: करोति यस्योपरि भवति भगवत: कृपा**[२]।' इति।

साम्प्रतं ब्रह्मपरब्रह्मणोर्भेदविषयकानि प्रमाणान्युपस्थापयाम:।

**दिव्यो ह्यमूर्त: पुरुष: स बाह्याभ्यन्तरो ह्यज:।**
**अप्राणो ह्यमनो: शुभ्रो ह्यक्षरात्परत: पर:**[३] ॥

**परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञ: सर्वो भवति:**[४]।

**ब्रह्मविदाप्नोति परम्**[५]"

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
**क्षर: सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥**
**उत्तम: पुरुषस्त्वन्य: परमात्मेत्युदाहृत:।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर:॥**
**यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तम:।**
**अतोऽस्मि लोके वेदे च प्रथित: पुरुषोत्तम:**[६]॥

**आत्माऽऽत्मा चाक्षरात्मा च ह्येष आकाशनिर्मल:।**
**दिव्यदृगीक्ष्य: सन्मात्र:, पुरुष:.......॥**

---

१-स्वामिनारायणवेदान्तसार: पृ-२४
२-वचनामृतम् लोया-१५
३-मुण्डकोपनिषत् २/१/२
४-प्रश्नोपनिषत् ४/१०
५-तैत्तिरीयोपनिषत् २/१/१
६-भगवद्गीता १५/१६-१८

**क्षरात्मानौ विशते देव एकः**[१] ।
**परात्परं पुरुषमुपैति दिव्यम्**[२]।
**अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नतर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्**[३]।

अयं भावः-''**ह्यक्षरात्परतः परः** '' इत्यत्राक्षरात्परत्वेन परब्रह्मणः निरूपणं वर्तते। **परमेवाक्षरं**.....सर्वो भवतीत्यत्र अक्षरब्रह्मसेतुरेव परब्रह्मासिरुक्ता। **ब्रह्मविदाप्नोति परमि**त्यत्रापि तदेवोक्तिः । **द्वाविमौ....पुरुषोत्तमः** ''इत्यत्रा-क्षरात्परोत्तमः पुरुषोत्तम इत्युक्तः ।'' **आत्माऽऽत्मा चाक्षरात्मा.....पुरुषः**, इत्यत्रात्माऽऽत्मावदक्षरस्याप्यात्मत्वमुक्तं परब्रह्मणः । '**क्षरात्मनौ**....इत्यत्रापि परब्रह्मणोऽन्वयः। **परात्परं**.....इत्यत्रापि परात्-अक्षरात्-परः, पुरुष- परब्रह्मेति वचनम्। **अथ यदिदम्....अन्वेष्टव्यम्**-इत्यत्रापि धामाक्षरस्थः परब्रह्मेति वचनम्। श्रुतिस्मृतिवचनैरेभिः ब्रह्मपरब्रह्मणोर्भेदो व्यक्तीभवत्येव ।
श्रीहरिवाक्यसुधासिन्धावप्युक्तं तयोर्भेदविज्ञानम् ।

**तमुवाच हरिः साधो भगवान् सांगकः सदा ।**
**भूरि तेजो दिव्यमूर्तिरस्तीत्येव मतं हि सत् ॥**
**सच्चिदान्दरूपं यत्पूर्णं ब्रह्मास्ति सर्वतः ।**
**तेजस्तस्यैव तज्ज्ञेयं निःप्रतीकमनावृतम्**[४]॥ इति

**क्षरात्मा चाक्षरात्मा च क्षराक्षरपरोऽस्ति सः**[५]।

**तदेकं सच्चिदानंदरूपं तेजः प्रकाशते ।**
**ब्रह्माख्ये तत्र भगवान् राजते पुरुषोत्तमः**[६]॥

**भक्तिज्ञान प्रतापेन शुकब्रह्मशिवैः समाः ।**
**भवेयुः पुरुषेणापि केचिच्चाक्षरसन्निभाः ॥**
**न तु कोऽपि भवेत्क्वापि पुरुषोत्तमसन्निभः।**
**एक एवेत्यतो वेदैर्गीयतेऽनुपमो हि सः**[७]॥

**आत्मात्मा चाऽक्षरात्मा च सोऽस्ति कृष्णः परात्परः ।**
**ब्रह्मरूपानंतकोटिमुक्तसंघनिषेवितः**[८]॥

---

१-श्वेताश्वतरोपनिषत् १/१०
२-मुण्डकोपनिषत् ३/२/८
३-छांदोग्योपनिषत् ८/१/१
४-हरिवाक्यसुधासिन्धुः ४५/६-७
५-हरिवाक्यसुधासिन्धुः ७२/३२
६-हरिवाक्यसुधासिन्धुः १०३/२९
७-हरिवाक्यसुधासिन्धुः १०६/१५-१६
८-हरिवाक्यसुधासिन्धुः ११८/५७

**अक्षरस्यापि कृष्णस्तु कारणं चाश्रयो मतः ।**
**प्रेरकश्चात एवाऽसौ सर्वसेव्य उदीरितः [१]।।**

**यस्मिंस्तेजसि तद्रूपं भवत्येकरसे सिते ।**
**तदक्षरात्मब्रह्मादिनामभिः संप्रकीर्त्यते ।।**
**यस्तत्र भगवान् साक्षात् स परब्रह्मसंज्ञकः ।**
**आत्मतत्त्वाभिधश्चासौ पुरुषोत्तम उच्यते [२]।।**

**यो वासुदेव भगवानक्षरात्पर उच्यते ।**
**सः श्रीकृष्णः परंब्रह्म सर्वकारणकारणम् ।।**
**मायायां वीर्यमाधत्त स एव पुरुषात्मना ।**
**अक्षरात्मा स पुरुषो मुक्तो ब्रह्मेति चोच्यते [३]।।**

अत्र "**अक्षरात्मा**" "**ब्रह्माख्ये तत्र भगवान्** " "**केच्च्चाक्षर-सन्निभाः**" "**सोऽस्ति कृष्णः परात्परः**" "**अक्षरस्यापि कारणं चाश्रयो मतः**" "**अक्षरात्पर उच्यते**" एभिः सर्वैः प्रमाणैः ब्रह्मपरब्रह्मणोर्विद्यमानो भेदः सम्यक् समर्थितो भवति।

## ५.७ ब्रह्मणः द्विविधस्वरूपवत्त्वम्

ऐकान्तिकभक्तैः सम्प्राप्यो भगवान् स्वामिनारायण एकविंशतितमे तरंगे श्रीहरिवाक्यसुधासिन्धोः स्वधामस्वरूपस्य ब्रह्मणो मूर्तामूर्तभेदेन स्वरूप-द्वैविध्यमाह। तथाहि-

**द्वेधोक्तमक्षरं ब्रह्म मूर्तं चामूर्तमित्यदः ।**
**मूर्तं तत्रास्ति कृष्णस्य सेवायां दिव्यविग्रहम् ।।**
**अमूर्तं धाम कृष्णस्य स नित्यं तत्र राजते ।**
**चिदाकाशादिपर्यायैस्तदेवान्यत्र तूदितम् [४]।।**

अत्र ब्रह्मरसायन भाष्यम्-"ब्रह्मधामस्वरूपं द्वेधा प्राह।" उक्तं पंचालायाः प्रथमे तरंगे यच्चाऽक्षरब्रह्म तत्तु भगवन्निवासधामास्ति। मध्यस्य त्रयोदशे-तदेतदेकरसतेज आत्मा ब्रह्माऽक्षरधाम कथ्यते, अन्तर्यामिसर्वपरिपूर्ण-सच्चिदानंदब्रह्म तु श्रीपुरुषोत्तमभगवतस्तेजोऽस्ति, अन्तर्यामिजीवेश्वरादिव्यापकं श्रीपुरुषोत्तमभगवद्ब्रह्मरूपतेजस्तु निराकारं कर्मफलप्रदानसमर्थं साकारमिव भवतीति। तदक्षरं द्वेधोक्तं श्रुतिभिरपि मया परमात्मनि द्वेधा रक्षितं, तत्रैकं मूर्तं

१-हरिवाक्यसुधासिन्धुः १३६/३५
२-हरिवाक्यसुधासिन्धुः १४६/३०-३१
३-हरिवाक्यसुधासिन्धुः १६३/५-६
४-हरिवाक्यसुधासिन्धुः २१/२२-२३

द्वितीयं अमूर्तञ्चेति। परब्रह्मस्थाऽव्यभिचार्येकत्व-संख्योत्तरवीप्साप्रयोज्यसंख्यात्वं द्वित्वम्, तदव्यभिचरितं यत्रैकत्वेऽपि अवस्थाभेदेन तदक्षरं ब्रह्म, आकारविध-यानाकारविधया च द्वित्त्वाश्रयम्, आकारो मूर्त्तिस्तदात्मकत्वं मूर्त्तत्वं सेवनादिव्यापारवत्त्वं मूर्तत्वम्, अनाकारोऽमूर्त्तिस्तदात्मकत्वं अमूर्तत्वम्, आधारमात्रव्यापकस्वरूपत्वं अमूर्तत्वम्, केवलान्वयिप्रकाशत्वं अमूर्तधामत्वम्, परिपूर्णं केवलान्वयित्वं ब्रह्मत्वं बृहत्प्रकाशं धामत्वम् । मूर्तमिति । तयोर्मूर्तं चाक्षरधाम श्रीहरिकृष्णस्य परब्रह्मणः सेवायां परब्रह्मसममूर्तं दिव्यस्वरूपसत्साकारं दिव्यविग्रहं भगवन्मूर्तिप्रकाशपिण्डात्मकं रूपानुरूपकरचरणाद्यवयवावयविरूप-पुरूषाकारातिसुन्दरं वर्तते चैकतत्त्वप्रकाशघन पिण्डमूर्तिरिति ।

दिव्यविग्रहमिति । विशिष्टो विलक्षणो ज्ञानं सार्वज्ञ्यं नित्यज्ञानं यत् मूर्तेभगवन्मूर्तेः प्रकाशो ज्ञानाऽपृथगविशिष्टप्रकाशपिण्डः सर्वावयविशक्त्यैश्वर्य-गुणसामर्थ्यादिसंभृतः सुमूर्तः पुरुषोऽक्षरब्रह्माऽभिधानश्चतुर्थत्वेन परब्रह्मणा श्रीहरिणा स्वयमुपदिष्टः परिचायितः स एवाक्षरधाममूर्तिस्वरूपोऽक्षरपुरुष इति। प्रकाशमात्रकरपादमुखोदरादिरित्यस्माभिरस्मद्रीत्या व्यवहृतः प्रकाशघन सुमूर्तपुरुषः परमात्माऽव्यवहितोत्तरव्यवस्थितिपंक्तिगतस्थानापन्नो द्वितीयावय वात्मकः इति, स च दासवत् सेवकः ।

अथामूर्तमक्षरधामाद् अमूर्तमिति । श्रीहरिकृष्णभगवतः परब्रह्मणो धाम निवासस्थानं प्रकाशस्तरस्वरूपं व्यापकमेकरसचैतन्यप्रकाशात्मकं, तदत्र धाम्नि सोऽहं श्रीहरिकृष्णः श्रीस्वामिनारायणो भगवान् परब्रह्माऽसंख्यनित्यमुक्तैः प्राप्तमुक्तैश्च संसेव्यमानो विराजे, अलौकिकैश्वर्यनिरतिशयराजाधिराजशोभावानस्मि, तन्मम धाम चिदाकाशो दहरचिद्व्योमपरमव्योमब्रह्मपुरब्रह्मलोकब्रह्ममहोलाऽक्षर-धामादिशब्दैरस्मद्व्यवहारविषयः, इति। तद्धाम नित्यं स्वरूपपरिवर्तनरहितमपि सर्वान्तर्यामी सर्वरूपानुरूपसमर्थमिति [१]।"

अत्रायमाशयः तस्याक्षरब्रह्मणः द्वे स्वरूपे स्तः, प्रथमं तत्रैकरसनिराकार-चैतन्यस्वरूपमेव। तदेव चिदाकाशः, ब्रह्मज्योतिः, ब्रह्ममहोलः, अक्षर तेजपूंज तेजमण्डल इति व्यपदिश्यते । द्वितीयं तावत्रूपावयवयुक्तं प्रकाशपिण्डो अस्मदादिवद् दिव्यपुरुषाकारेण परब्रह्मपुरुषोत्तमनारायणसेवाधर्मं आचरतीति। अत्र दर्शनेऽस्याक्षरस्य साकारस्य चतुर्थतत्त्वेन परिगणनमिति श्रीकृष्णवल्लभाचार्यः। कोटिकोटीन्द्वर्कतेजोनिभाक्षरे परे व्योम्नि श्रीपुरुषोत्तमनारायणः मुक्तान्नानंदयन्नास्ते, तस्मिन्नक्षरे तत्साधर्म्यापन्ना असंख्याः मुक्ताः सुकिशोररूपाः निवसन्ति, ते सर्वे परब्रह्मानुचराः यथावकाशसेवाधर्मिणः । अक्षरस्यापि सेवकत्त्वं मूर्तरूपेणैवेति

१-तत्रैव ब्रह्मरसायन भाष्यम् प्रथम खण्ड पृ. २६८

तु श्रीहरिणा कण्ठत एवोक्तमतो न हि सन्देहावसरः ।

अत्रेदं विशेषेणावधेयम् प्रकाशपिण्डाक्षरब्रह्मण्यपि शरीरी श्रीपुरुषोत्तम-नारायण एव न तु प्रकाशात्मकमहः शरीरीति । तेजः प्रकाशस्यापि शरीरी परब्रह्मैव, तस्य सर्वशरीरीत्वात् । श्रीहरिवाक्यसुधासिन्धौ १९६-१९१७-०४-१८३, तरंगेषु अक्षरब्रह्मणश्चापि शरीरीत्वं प्रतिपादितं भगवता श्रीस्वामिनारायणेन, विशेषस्तत्रैव दृष्टव्यम ।

यस्याक्षरं शरीरम् इत्यपि श्रुतिवचनमत्र प्रमाणम् ।

मूर्तस्वरूपेणाक्षरस्याक्षराधिपतेरनुचरभावस्तूक्तमेव । अत्राक्षरे स्वरूपस्वरूपी भावो नैव भवति । दर्शनजगत्यश्रुतपूर्वोऽयमुद्घोषः भगवान् श्रीस्वामिनारायणस्य तत्पूर्वं कुत्रापि केनापि भगवद्धामस्याक्षरस्य सेवकत्वं साकारस्वरूपेणोक्तमिति न श्रूयते । "**एतत्तु वैष्णवं धाम**" इति लक्ष्मीधाम रूपेत्युक्तिस्स्तुतिपरैव न तु धामपरा । श्रीस्वामिनारायणदर्शन एव ब्रह्मणो भगवत्सवेकत्वरूपेण प्रतिपादनं कृतमस्ति ।

"सेवकभावेन धामभावेन चावस्थानं चास्याक्षरब्रह्मणः" श्रीहरिवाक्य-सुधासिन्धोः सेतुमालायामपि द्विविधरूपता ब्रह्मणो हि वर्णिता । तथाहि-

**मूर्तं तु दिव्यविग्रहं नाम रूपानुरूपकरचरणाद्यवयवविशिष्टत्वेनातिसुन्दरपुरुषाकारमूर्तिमत् । कृष्णस्य ततोऽप्यतिनिरतिशय शरीरं शोभावतः स्वेष्टदेवस्य श्रीकृष्णभगवतः सेवायामस्ति दासवत्सदा वर्तते इति** [१]।

**किञ्च तदक्षरं कृष्णस्य सेवकत्वान्मुख्यपरिचारकत्वाद् हेतोः दिव्यैरतिमनोहरैः पाणिपादमुखादिभिः अवयवैः प्रतीकैरुपलक्षितत्वाद् साकृतिः पुरुषाकारमपि** [२]।

**यः हरिः स्वकीयाक्षरब्रह्मधाम्न्यक्षरभावापन्नमुक्तकोटिभि र्मूतेनाक्षरब्रह्मणा च छन्दानुवृत्तितया कृतपरिचर्यः** [३] ।

**चरम पुरुषाकृत्या मत्सेवायां स्थितम्** [४]।

इत्यादि श्रीरघुवीराचार्यशुकानंदस्वामिगोपालानंदस्वामिनां वचांसि अक्षरस्य भगवत्सेवकत्वसिद्धौ प्रामाण्यमावहन्ति । श्रीमत् सत्संगिजीवनमप्यैतदेव वदति । तद्यथा-

**सत्यं ज्ञानमनन्तं च पूर्णं चाखण्डमक्षरम् ।**
**धाम यद्वासुदेवस्य मूर्तं चामूर्तमुच्यते ॥**
**शुद्धं नित्यं चाविकारि मायादीनां प्रकाशकम् ।**

१-हरिवाक्यसुधासिन्धुः २१/२२ श्लोकस्य सेतुमाला
२-हरिवाक्यसुधासिन्धुः ६९/४९ श्लोकस्य सेतुमाला
३-हरिवाक्यसुधासिन्धुः ५९/५ श्लोकस्य सेतुमाला
४- भगवद्गीता १३/१५ गोपालानंद स्वामिकृतं भाष्यम्

**तद्ब्रह्ममेति विजानीहि सर्वाधारतया मतम्** [१]॥ इति ।

अत्राह: श्रीशुकानंदमुनिः **वासुदेवस्य श्रीकृष्णभगवतः । धाम निवासस्थानम्। मूर्तं भगवत्सेवायां पुरुषरूपेण स्थितत्वात् मूर्तिमत् । अमूर्त निरवयवधामरूपेण मूर्तिवर्जितं च** [२]।

श्रीविहारीलालाचार्योऽपि तत्रैव वक्ति-

**यदेतदक्षरं ब्रह्म तद्धि भगवतो वासुदेवस्य धामरूपेण वर्तमानं करचरणाद्यवयवरहिततयाऽमूर्तं, करचरणादिदिव्यावयवविशिष्टेनापरेण रूपेण सेवायां वर्तमानतया मूर्तं चोच्यते** [३] ।

अन्यत्र च श्रीस्वामिनारायण दर्शने श्रीकृष्णवल्लभाचार्येण अक्षरधामाधिकरणे **एकरसतेज आत्मनोऽक्षरधामत्वात्** [४]।

इति सूत्रे कल्याणीवृत्तौ श्रीहरिवचनप्रामाण्यनिर्देशपुरःसरमक्षरब्रह्मणो माहात्म्यं स्पष्टीकृतं वर्तते । प्रतीक ब्रह्माद्यधिकरणे ब्रह्मांडाकारदृष्टेर्दहराऽक्षि-विद्यात्वात् । तद्वृतौ चामूर्तं चिदाकाशस्वरूपवर्णनं कृतमस्ति। एवमेव पञ्चतत्त्वनिर्णयनामके ग्रन्थे मूर्ताऽमूर्तभेदत्वेऽपि ब्रह्मणः तत्त्वत ऐक्यं प्रतिपादयन् प्राह श्रीकृष्णवल्लभाचार्यः ।

**मूर्तरूपं चाक्षराख्यं प्रकाशाख्यं त्वमूर्तकम् ।**
**मूर्ताऽमूर्तकृतो भेदस्तत्त्वैक्येऽप्युपचारतः ॥**
**प्रकाशप्रभयोर्भेदो यथैक्येऽपि समुच्यते ।**
**सूर्याऽऽतपप्रभेदोऽपि यद्वद् ब्रह्मणि तद्विधः॥**
**प्रकाशपिण्डस्तस्माद्वै ब्रह्माक्षरं सुमूर्तकम् ।**
**अप्यण्डव्यापकं धामाऽक्षरं प्रकाशरूपि तत्** [५]॥

## ५.८ ब्रह्मविषयकं साम्प्रदायिकं वैमत्यम्

इदं तु निश्चप्रचं यत् स्वामिनारायणसम्प्रदाय एव ब्रह्मणः पृथक् तत्त्वरूपेण निरूपणं कृतं वर्तते । एतद् व्यतिरिक्तेषु दर्शनेषु एतादृशी चर्चैव नहीदानीं यावत् समुपस्थापितो । अक्षरस्य ब्रह्मणोऽन्वयव्यतिरेकत्वं, सगुणत्वं निर्गुणत्वं च, मूर्तामूर्तत्वञ्च भगवदभिमतं वर्तते, इति सवर्मस्मिन्नेव प्रकरणे मया यथाशक्ति निरूपितम् उपन्यस्तानि च प्रमाणानि वचनामृतस्य हरिवाक्यसुधासिन्धोः श्रुत्यादिकानां च भगवता स्वामिनारायणेनापि प्रतिपादितं यत् चिदाकाशः, दहरविद्या, अक्षिविद्यादिकेषु नामसु तत्र-तत्र अक्षरधामैव निर्दिष्टम् ।

---

१-सत्संङ्गिजीवनम् -१/५१/३२-३३
२-तत्रैव हेतुटीका -पृ.१६०
३-तत्रैव भावप्रबोधिनी -पृ.१६०
४-श्री स्वामिनारायण दर्शनम् -९४/१७४
५-पंचतत्त्वनिर्णयम् -पृ. ११४

# ब्रह्मविषयकं वैमत्यम्

## साम्प्रदायिकाः

भगवान श्री स्वामिनारायणः
↓
मूलाक्षरः
↓
मूलपुरुषः मायया संयुनक्ति
↓
महतत्त्वम्
↓
अहंकारः
↓
वैराजपुरुषः
↓
ब्रह्मा
↓
चतुर्दश भुवनानि

## एकदेशिनः

भगवान श्री स्वामिनारायणः
↓
अक्षर कोटी — मूलाक्षरः
↓
ब्रह्मकोटी — वासुदेवब्रह्म
↓
ईश्वरकोटी — मूलपुरुषः मायया संयुनक्ति
↓
महतत्त्वम्
↓
अहंकारः
↓
वैराजपुरुषः
↓
ब्रह्मा
↓
चतुर्दश भुवनानि

इदमपि तथ्यमास्ते यत् उपषित्सु निगूढमेव अक्षरतत्त्वमस्मिन् दर्शने प्रकटीकृतं वर्तते भगवता स्वीयया ऋतम्भरया प्रज्ञया। तच्च तत्त्वम् चतुर्थम्, परब्रह्मापेक्षयाऽपकृष्टम् जीवेश्वरमायाभ्यो उत्कृष्टं च भवतीति।

अत्र केचनैकदेशिन अस्यैव तत्त्वस्य सर्वोत्कृष्टतां साधयितुं विवदन्ते। किन्तु सम्प्रदायेऽस्मिन् समे विचारका अक्षरतत्त्वस्यापकृष्टत्वं, परस्य ब्रह्मणश्च सर्वोत्कृष्टतां च स्वीकुर्वन्ति। अत एव सम्पूर्णजगत्कारणभूतस्य परस्य ब्रह्मण: एव सर्वोत्कृष्टता स्वीकर्तव्येत्यस्माकमभिमतिः।

## ५.९ ब्रह्मणः सर्वोत्कृष्टत्वम्

भगवान् स्वामिनारायणः अन्वयव्यतिरेकद्वारा वचनामृतस्य गढपुरप्रकरणे एकविंशति वचनामृते ब्रह्म मूर्तामूर्तरूपम्, गढपुरमध्यम प्रकरणे द्विचत्वारिंशत्तमे वचनामृते सगुणनिर्गुणम्, गढपुर प्रथम प्रकरणे पञ्चचत्वारिंशततमे वचनामृते चिदाकाशं तथाविभिन्नेषु वचनामृतेषु च परब्रह्मणोधामप्रत्यपीपदद् ब्रह्म।

**जीवेश्वरमायापेक्षया ब्रह्मण उत्कृष्टत्वं तु निर्बाधमेवास्ति। किन्त्वनादिकालत एवामृतपदमधिगतेषु मुक्तेषु ब्रह्माक्षर एव ज्यायान् इति। श्रूयते यद्यपि जीवेश्वरयोर्यत्राऽनेकत्वं किन्तु ब्रह्मपरब्रह्मयोरेकत्वमेव। परब्रह्मवदक्षरब्रह्म अपि तत्त्वतश्चैकमद्वितीयं च। यद्यपि कृतसफलयत्नाः संख्यातीताः जीवाः ब्रह्मधर्माणाः भवन्ति, तथापि तेषु नहि कोऽपि ब्रह्म भवति**[१]।

चिदाकाशरूपेणाक्षरस्त्वनन्तकोटिब्रह्माण्डाधारः। अक्षरधामरूपेण परब्रह्मणो निवासस्थानम्। मूर्तरूपेण धाम्न्यपि श्रीहरिसेवायां दासरूपेण लोकेऽस्मिन् गुणातीतसत्पुरुषरूपेणजीवपरब्रह्मसम्बंधकर्तारूपेणेति भेदचतुष्टयेऽपि तत्त्वतश्चैक्यमेवेति केषांचन राद्धान्तः।

ब्रह्मधामनि अनन्तकोटिमुक्तवृन्देन मूर्तेनाक्षरब्रह्मणा च सेवितो राजते श्रीहरिरित्याह श्रीरघुवीराचार्यः श्रीहरिवाक्यसुधासिन्धुसेतुमालायाम्। तथाहि- **श्रीहरिः स्वकीयाक्षरभावापन्नाऽक्षरभावाऽऽपन्नमुक्तकोटिभिः मूर्तोनाक्षर ब्रह्मणा च छन्दानुवृत्तितया कृतपरिचर्यः**[२] इति। अत्रैकवचनेन कृतोल्लेखः एकत्त्वावबोधकः, अद्वितीयत्वरक्षिततत्त्वप्रयोजकश्च। भाषावचनामृत-प्रयुक्तमक्षरार्थैकवचनमपि तस्यैकत्वमद्वितीयत्वं च ज्ञापयति।

अनादिमुक्तस्त्वेक एवाक्षरः, अन्ये जीवेश्वरादयः कृतोपासनाः परब्रह्माक्षरसम्बन्धेन ब्रह्मभावापन्नाः अक्षरमुक्ताभिधाः। ब्रह्मसायुज्याप्तावपि वैधर्म्यमावहन्त्येव। तद्यथा-

---

१-वचनामृत रहस्य खण्ड ३ पृ. ६५ २-हरिवाक्यसुधासिन्धुः ५९/५ सेतुमाला

साधर्म्यापन्नानां सेवकानां मुक्तानां ब्रह्मवैधर्म्य वर्णयति श्रीवचनामृत-रहस्यकारो निम्नांकित प्रकारेण ।

अक्षरब्रह्माक्षरमुक्तयोर्तत्त्वत: स्वरूपतश्च भिन्नत्वमेव, अक्षर ब्रह्मस्वरूपत: तत्त्वतश्च ब्रह्मैव, अक्षरमुक्तानां स्वरूपत: तत्त्वतो वा जीवेश्वराऽन्यतमत्वम् ।

अक्षरब्रह्मणोऽनादिकालत एव मायासंश्लेषाऽभाववत्वम् । मुक्तानां तु साधनया भक्तिप्रपत्तिभ्यां ब्रह्म-परब्रह्म प्रसंगान्मुक्तत्वं मायाबन्धत:।

अक्षरब्रह्मणश्चैकत्वं मुक्तानामनेकत्वम् ।

अक्षरब्रह्म परब्रह्माऽनन्तमुक्तधारणक्षम:, न तु मुक्ता:।

अक्षरब्रह्म चिदाकाशरूपेणानन्तकोटिब्रह्माण्डान् हि व्याप्याधार:, न तु मुक्ता:।

अक्षरब्रह्मण: परब्रह्मणोऽतिस्निग्धसेवकत्वादुत्कृष्टत्वात्त्वादर्शरूपत्व - मन्येषां, न तु मुक्तानामिति ।

अक्षरब्रह्मण: ब्रह्मसाधर्म्यप्रदातृत्वरूपमैश्वर्यसद्भाव: । मुक्तानां तदभाव: ।

तात्पर्यतोऽक्षरब्रह्म परब्रह्मण मुख्यपरिचारक:, अनाद्यनंतकोटिमुक्तेष्वपि सर्वोत्कृष्ट: । परब्रह्मवदक्षरब्रह्माऽपि सदेवाद्वितीयमेकमेव चेति । अत एव तत् परब्रह्मव्यतिरिक्तेभ्य: सर्वेभ्यस्तत्त्वेभ्य उत्कष्टमेवेति ।

## ५.१० ब्रह्मणो व्यतिरेकस्वरूपसम्बन्धाऽभाव:

अत्रैकदेशिनोऽपरे चतुर्विंशतितत्त्वेभ्य: परस्त्रिविधाहंकार:, तत: परमहत्तत्त्वं महत्तत्त्वापरं प्रधानं, प्रधानाद् परस्तत्पति:, प्रधानपुरुष:, प्रधानपुरुषात्परा मूलमाया मूलप्रकृति, महापुरुष:, मूलपुरुषात्परो वासुदेवाख्यो ब्रह्माऽस्ति । ततश्च परं चतुर्थतत्त्वरूपमक्षरब्रह्म ।

चतुर्थ तत्त्वरूपेण प्रतिपाद्यमानादक्षरात्स्वरूपस्वभावगुणैश्वर्यादिना श्रेष्ठयाद् सर्वाधारकत्वाच्च सर्वनिवासभूतत्त्वाच्च परं अक्षरात्परत: पर: इति श्रुत्यभिहितं श्रीपुरुषोत्तमस्यावतारिणो धामत्वेनोक्ताक्षरब्रह्मण: स्थितिर्वर्तते । तस्मिन्नेव चिदाकाशाख्ये स्वब्रह्मधाम्नि परात्पर: परब्रह्म आनंदकंदो राजते । सदासाकार स्वरूप: श्रीस्वामिनारायण: परब्रह्म । तत्रस्थ: सन्नक्षरादिष्वन्वयतयातंर्यामिशक्त्या स्थित: कर्मानुरूपफलप्रदेति । यत्रावतारणामवतारि परब्रह्म सदैव राजते स एवाक्षरब्रह्मधाम ब्रह्मधामब्रह्मपुरचिदाकाशादि शब्दैर्ज्ञायते श्रूयते च शास्त्रेषु । अयं भाव:- यत्र मुख्यसेवकरूपेणाऽक्षरब्रह्मस्वरूपवर्णनं क्रियते तत्रैव परब्रह्मण: धामरूपेण् तदङ्गकान्तिरिति स्वीकृत्य श्रीहरिस्वरूपकान्त्याऽभिप्रेरितं सृष्टिकर्तृ मूलाक्षरब्रह्म स्वयं निजौजसा मूर्तिमन्तं वासुदेवब्रह्म प्रेरयति, वासुदेवब्रह्म

[stamp]

तावन्नरनारायण महाकाल महापुरुषादीन् प्रेरयति। ततो सृष्ट्युत्पत्तिः सृष्टिविकासश्च इति परंपरां ज्ञात्वेदं निर्णीयते सर्वोपरिसर्वकर्तासर्वनियंतासर्वाधारसर्वसर्वव्यापक-स्वयंप्रकाशनिर्विकाराऽसंगीसनातनाऽखण्डाऽनादिसाकाराऽऽनन्दघनमूर्ति र्भगवान् श्रीस्वामिनारायणः निजांगकान्तिस्वरूपेऽक्षरधाम्नि राजतेऽनन्तानादिमुक्तगण कृतपरिचरणः । स एवाखिलहेयप्रत्यनीकासंख्येय कल्याणगुणगणावस्य व्यतिरेकस्वरूपः । तस्मिन् संस्थिता अनादिमुक्ताः भगवत्सौख्यसुखिताः । परमेकान्तिकामुक्तास्तु तत्सम्मुखसंस्थिताः तदाननवीक्षणैकसंलग्नाः, तत्स्वरूपसौख्यनिमग्नाः, एकान्तिकाः जीवन्मुक्ताः मूर्तिरसास्वादनपात्रभूता इति मुक्तानां भेदः ।

एते मुक्ताः, तदधिपतिना साकं स्वस्मिन्नेव निवसन्ति, सर्वाधारः श्रीस्वामिनारायणः। स्वीयेन महसा मुक्तानपि धारयितुं क्षमः, धारयति च। नहि तत्राक्षराधारस्यावश्यकत्वम् । अन्यथा आधारधारितत्वेन तावत्सामर्थ्यक्षतिः दुर्निवारा स्यात्। भगवान् श्रीहरिः परब्रह्म कोटिकोटीन्द्वर्कवद्देदीप्यमानस्वरूपः वर्तते । भगवतोऽन्वयरूपेण सर्वत्र सर्वस्मिन् सर्वदान्वयाद् सर्वान् यथाक्षर-ब्रह्मणोऽपि तस्यान्वयस्वरूपस्यैव सम्बन्धः, न तु व्यतिरेकस्वरूपस्यापीति। तेषां सिद्धान्तः। कैवल्यमुक्तिंगतानामनादिमुक्तानामेव तत्स्वरूपस्य व्यतिरेकस्य सम्बन्धः ।

मूलाक्षरब्रह्म परब्रह्मवदेकमद्वितीयञ्चेति पूर्वमुक्तं मया । अत्र तावदन्ये परब्रह्मातिरिक्तानां एकत्वं अद्वितीयत्वं वा न सहन्ते। समभ्यधिकदारिद्र्यहानेः। विशेषश्चात्र अक्षरपुरुषाणामनेकत्वम्। सृष्टेर्मूलकारणत्वादेवास्य मूलाक्षरेत्यभिधा। मूलाक्षाराणां कोट्यः। अक्षरेभ्यः परं अक्षरधाम। श्रीहर्यङ्गकान्तिस्तस्मिन् प्रकाशयुजे तेजोराशिमण्डले विराजते सर्वरसरूपमूर्तिः श्रीपरब्रह्म तस्य महिमानं पारं गन्तुमक्षमा अक्षरादयः ।

श्रीहर्यङ्गकान्तिस्वरूपाक्षरधाम्नः प्रतिमरीचिषु मूलाक्षर ब्रह्म मूलपुरुषश्च ईश्वरस्य च कोटयः भवन्ति । तासां सर्वासां कोटीनामाधारः प्रेरकः नियन्ताः चाक्षरधाम वर्तते । तस्य बृहत्वं शास्त्रेषु गीयते, तस्यैकरोमविवरेऽ-नन्तकोटिब्रह्माण्डानि अणुवदाभासन्ते । तदक्षरं श्रीहरिकृष्णपरमात्मनोऽ-ङ्गकान्तिस्तथापि न हि स्वरूपस्वरूपीभावः। मूर्तेर्कार्यत्वात्तेजसः कार्यकारणभावः शरीरशरीरीभावो वा सेत्स्यति। तदक्षरं द्वेधा-निराकारैकरसचैतन्यमात्रं तच्चिदाकाश ब्रह्ममहोल शब्दाभिधेयम्। तदक्षररूपतेजः मूर्तिमतः मूलाक्षरस्य शरीरी व्यापक द्रष्टा आत्माऽऽधारो वा विद्यते । तत्तजेसाऽन्तर्यामिरूपेण संञ्चोदितो मूलाक्षरः सर्गोत्पत्यादिकं करोति । तेजोरूपाक्षरधामनि । मूर्तिमान्नक्षरोऽपि स्वयम् । स

एवं सर्गोत्पत्यादिकं सेवां कुरुते इति। एकस्तत्राक्षरधामरूपः निराकारः, द्वितीयश्च मूर्तिमान् मूलाक्षररूपसेवकः सृष्टिसर्गोत्यत्यादिरूपसेवाधर्मवान्।

सगुणनिर्गुणत्वनिर्वाहोऽपि सगुणत्वं नामाऽपारात्वम्, निर्गुणत्वं नाम सूक्ष्मत्वमिति कुर्वन्ति।

## ५.११ ब्रह्मविषयकं श्रीकृष्णवल्लभाचार्यमतम्

ब्रह्मरसायनभाष्यादिकानां प्रणेता पण्डितवरेण्यः श्रीकृष्णवल्लभाचार्यः स्वीकरोति यत् स्वामिनारायणदर्शनाभिमतेषु तत्त्वेषु चतुर्थं तत्त्वम्। तद् हि मुक्तानामाधारः परब्रह्मव्याप्यश्चेतनः, परस्माद्ब्रह्मणो भिन्नम् केवलान्वयि, परस्य ब्रह्मणः शरीरस्वरूपं तद्धामरूपञ्च वर्तते। सः स्वयमेव वक्ति–

**"तच्च ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं परब्रह्मणस्तेजोविशिष्टं अक्षरधामसंज्ञकं मुक्तानामाधारभूतं चेति[१]।"**

अस्य स्वकीयकथनस्य प्रामाणिकत्वाय स ह्याचार्यवर्यः निम्नांकितानि वचांसि श्रौतानि स्मार्तानि चोपन्यसति। तथाहि–

**ह्येतदेवाक्षरं ब्रह्म ह्येतदेवाक्षरं परम्।**
**ह्येतदेवाक्षरं ज्ञात्वा ब्रह्म लोके महीयते**[२]॥ इति

**सत्यं ज्ञानमनन्तं च पूर्णं चाखण्डमक्षरम्।**
**धाम यद्वासुदेवस्य मूर्तं चामूर्तमुच्यते**[३]। इति

**सत्यं ज्ञानमनन्तं यद् ब्रह्मज्योतिः सनातनम्।**
**यद्विपश्यन्ति मुनयो गुणापाये समाहिताः**। इति

एवंविधानि इमे आचार्याः मन्ये पञ्चाशत् संख्याकानि प्रमाणवाक्यान्युपन्यस्तवन्तः।

बहुभिः प्रमाणैरयमाचार्यवर्यः ब्रह्मणः परब्रह्मव्यतिरिक्तानां सवेषां तत्त्वानां प्रकाशकत्वं, ब्रह्मव्यतिरिक्ततत्त्वेभ्य उत्कृष्टत्वम्, भगवद् धामस्वरूपत्वम् भगवद्दासत्वं च समर्तिथत्।

अस्मिन्नेव प्रकरणे सः सम्प्रदायैकदेशिनामपि मतं निम्नांकित प्रकरेणोपस्थापितवान्।

'सम्प्रदायैकदेशिनः' जीवेश्वर मुक्तकोटिवत् ब्रह्मकोटिमक्षरकोटिं तन्मुक्त मण्डलानि चाभ्युपगच्छन्ति। निरंजन ब्रह्मशबल ब्रह्मकेवल ब्रह्मणः स्थूलसूक्ष्मकारण महाकारणेति शरीरचतुष्टयम्। तत्र स्थूलशरीरात्मकं 'निरंजनब्रह्म'

---

१-स्वामिनारायण वेदान्तसारः पृ.२४
२-कठोपनिषत् १/२/१६
३-सत्सङ्गिजीवनम् -१/५१/३२

तस्यापराभिधानं अनादि श्रीकृष्णः 'वासुदेव' इति च। तस्य धाम नित्य गोलोकः तत्र सच्चिदानन्दात्मकदिव्यानन्तशक्त्यैश्वर्यपार्षदमुक्त मण्डलादिभिः संसेवितोऽनादि श्रीकृष्णपरमात्मा विराजते। तदुपासकानां तत् षष्ठं मुक्ति स्थानमिति। सूक्ष्मशरीरात्मकः 'शबलपुरुषः'। तस्य धाम शबलब्रह्मलोकः तत्र पञ्चशक्तिसहकृत पञ्चशिवपर्यङ्कस्थः शबलब्रह्मपुरुषोऽनन्तैर्दिव्यसच्चिदानन्दस्वरूपैः मुक्तैः शक्त्यैश्वर्यादिभिश्च संसेवितो विराजते। तदुपासकानां तत् सप्तमं मुक्तिस्थानमिति। कारणशरीरात्मकः केवल ब्रह्म पुरुषः।' तस्य धाम केवल ब्रह्मलोकः। अत्र ब्रह्मद्वीपे वेदिकायां सिंहासने आनन्दयोग मायादि शक्तिभिरनन्तदिव्यैश्वर्यमुक्तादिभिः सेवितः केवलब्रह्मपुरुषो विराजते। तदुपासकानां तदष्टमं मुक्ति स्थानम्।

महाकारण शरीरं चाक्षरं ब्रह्म तस्याक्षरधाम लोकः तत्र ब्रह्मप्रासादे दिव्यमण्डपे मुक्तमण्डलानि स्थितानि, तन्मध्ये ब्रह्मछत्रम्। तदधो दिव्यं सिंहासनं तत्र मूलाक्षरब्रह्म विराजते। तदुपासकानां तन्मुक्तिस्थानं नवममिति। अथ निराकारव्यापकरूपेणावस्थितं परमाक्षरधाम परब्रह्माङ्गी स्वामिनारायणपरमात्मन एतद्धामेति। तत्र धाम्नि अनन्ता मुक्तादिकोटयः सन्तीति वर्णयन्ति।' इति।

एतेन सम्पूर्णेन विवेचनेनायमर्थस्तु स्पष्ट एव यत् पण्डितवरेण्याः श्रीकृष्णवल्लभाचार्याः श्रीस्वामिनारायणदर्शस्य निर्भ्रान्तसमालोचकाः, अस्य सिद्धान्तस्य प्रतिष्ठाप्रकाशकश्च सन्तीति।

## ५.१२ ब्रह्मतत्त्वमीमांसायाः समालोचनम्

उपरि ब्रह्मविषयकः सर्वे विचाराः प्रायेण समुपस्थापिता एव। अनेन कृतेन विस्तृतेन विवेचनेनायमप्यर्थः स्पष्टो जातो यत्, ब्रह्मविषयकोऽयं विचारः दर्शनानां क्षेत्रे आधुनिकः, वैज्ञानिकः तर्कसम्मतः, प्रमाणोपबृंहितश्च वर्तते। यद्यपि ब्रह्मणोऽक्षरशब्देन, धामशब्देन, अक्षरधामशब्देन च तत्र-तत्रोपनिषत्सु वर्णनं कृतं वर्तते, अथापि भगवतः स्वामिनारायणात् प्राक्, कस्यापि दृष्टि एतस्य तत्त्वस्य पृथक् तत्त्वरूपेण विवेचने समर्था नाऽभूत्। ते सर्वे दार्शनिकाः ब्रह्मशब्देन परब्रह्मणः मिमांसाचक्रुः। अत एव एतस्य तत्त्वस्य पृथक् तत्त्वरूपेण निरूपणस्य प्रसङ्ग एव नाऽभूत्। अत एवेदं दर्शनं दर्शनानां क्षेत्रे नवीनां दृष्टिं प्रादात् ब्रह्मतत्त्वस्य पृथक् तत्त्वरूपेण निरूपणं कृत्वेति मे मतिः।

## ५.१३ उपसंहारः

नूनं ब्रह्मतत्त्वमिदं शास्त्रीयं विद्यते। स्वामिनारायणः भगवान् एव प्रथमं प्रकाशरूपेणास्य तत्त्वस्योपदेष्टा, एतस्य तत्त्वस्य स्वरूपस्य निरूपकश्च वर्तते।

भगवतः स्वामिनारायणस्यानन्तरमेव ते ते ग्रन्थकाराः भगवतः उपदेशानाश्रित्यास्य तत्त्वस्य विशदं निरूपणमकार्षुः इति। श्रुतिस्मृतिवचनप्रमाणोपन्यासपूर्वकमिति।